Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 30

No. of Printed Pages – 07

**P–95–Sanskritam - II**

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

# प्रवेशिका परीक्षा, 2019

## संस्कृतम्

## (द्वितीय – प्रश्नपत्रम्)

**समय** : 3¼ होराः

**पूर्णांक** : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः।

2) सर्वे प्रश्नाः अनिवार्याः।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि।

4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः।

5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः।

(गद्य – भागः)

## अतिलघूत्तरात्मकाः प्रश्नाः

1) कच्छपस्य मित्रे के? [1]

2) भिक्षापात्रं कः ताड़यति स्म? [1]

3) गजं दृष्ट्वा श्रृगालशिशुः कुत्र प्रधावितः? [1]

4) हंसाः षण्मासे–षण्मासे किं परित्यजन्ति? [1]

5) मत्स्ययोः मैत्री केन सह अभवत्? [1]

## लघूत्तरात्मकाः प्रश्नाः

6) जनैः धनस्य भोगः कथं करणीयः? [2]

7) कच्छपः कथं मृतः? [2]

8) पद्मसरः कीदृशम् आसीत्? [2]

9) अधोलिखितगद्ययोः कस्यचिदेकस्य सप्रसङ्ग–व्याख्या कार्या – [1+4=5]

(क) अथाऽसावभ्यागतः परं कोपमुपागतस्तमुवाच – भोस्ताम्रचूड! परिजातस्त्वं सम्यङ् न सुहृत्। तेन मया सह साहलादं न जल्पसि। तदेकमठप्राप्त्याऽपि त्वं गर्वितः, व्यक्तः सुहृत्स्नेहः, नैतद्वेत्सि यच्वया मठाश्रयव्याजेन नरकोपार्जनं कृतम्। तदहं त्वदीयं मठं परित्यज्य यास्यामि।

(ख) तदाकर्ण्य सिंही अन्तर्विहस्य प्राह–सम्यक् श्रृणु, वत्स! 'त्वं श्रृगालीसुतः। कृपया मया स्वस्तनक्षीरेण पुष्टिं नीतः। तद्यावदेतौ मत्पुत्रौ शिशुत्वात्, त्वां श्रृगालं न जानीतः, तावद् द्रुततरं गत्वा स्वजातीयानां मध्ये मिलितो भव। नो चेत् आभ्यां हतो मृत्युपथं समेष्यसि।' सोऽपि तद्वचनं श्रुत्वा भयव्याकुलमनाः शनैः शनैरपसृत्य स्वजात्या मिलितः।

10) अधोलिखितगद्ययोः कस्यचिदेकस्य सप्रसंगव्याख्या कार्या – [1+4=5]

(क) अथ तत्र सरसि सौवर्णो बृहत्पक्षी समायातः। तैश्चोक्तः – अस्माकं मध्ये त्वया न वस्तव्यम्। येन कारणेनास्माभिः षण्मासान्ते पिच्छैकदानं कृत्वा गृहीतमेतत्सरः। एवञ्च किंबहुना, परस्परं द्वैधमुत्पन्नम्। स च राजः शरणं गतोऽब्रवीत– 'देव ! एते पक्षिणः एवं वदन्ति, यद् – अस्माकं राजा किं करिण्यति।' न कस्याऽप्यावासं दद्मः।

(ख) अस्ति कस्मिंश्चिज्जलाशये कम्बुग्रीवो नाम कच्छपः। तस्य च सङ्कटविकटनाम्नी मित्रे हंसजातीये परमस्नेहकोटिमाश्रिते, नित्यमेव सरस्तीरमासाद्य, तेन सहाऽनेक – देवर्षि–महर्षीणां कथाः कृत्वाऽस्तमयवेलायां, स्वनीऽसंश्रयं कुरूतः। अथ गच्छता कालेनाऽनावृष्टिवशात्सरः शनैः शनैः शोषमगमत्।

11) एकस्याः कथायाः सारांशः संस्कृतभाषायां लेखनीयः। [4]

(क) सिंहशिशुश्रृगाल पुत्रकथा।

(ख) हिरण्यकताम्रचूऽकथा।

## (पद्य भागः)

### अतिलघूत्तरात्मकाः प्रश्नाः

12) नरस्य अधिकारः कुत्र भवेत्? [1]

13) कः नरः कुलीनः? [1]

14) रामः द्विधा किं न करोति? [1]

15) विवेकानन्दस्य गुरोः नाम किम्? [1]

16) कौत्सः कस्य शिष्यः आसीत्? [1]

### लघूत्तरात्मकाः प्रश्नाः

17) लोके कतिविधः आहारः? नामानि लिखत। [2]

18) नीतिशतकं केन विरचितम्? [2]

19) कैकेयी वरद्वयं किम् अयाचत? [2]

20) भारतभूवैजयन्ती केन कुत्र च उच्चैः नीता? [2]

21) रघु–कौत्ससंवादः कस्मात् महाकाव्यात् स्वीकृतः ? [2]

22) अधोलिखितेषु द्वयोः पद्ययोः सप्रसंग – व्याख्या कार्या – [1 + 2 × 2 = 6]

(क) नैवाकृतिः फलति नैव कुलं न शीलं

विद्यापि नैव न च यत्नकृतापि सेवा।

भाग्यानि पूर्वतपसा खलु सञ्चितानि

काले फलन्ति पुरूषस्य यथैव वृक्षाः।।

(ख) भरतः कोसलपतेः प्रशास्तु वसुधामिमाम्।

नाना रत्नसमाकीर्णां सवाजिरथसङ्कूलाभ्।।

(ग) मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।

भावसंशुद्धिरित्येतत्तपो मानसमुच्यते।।

23) अधोलिखितयोः श्लोकयोः एकस्य सप्रसङ्गभावार्थः लेख्यः। [1 + 3 = 4]

(क) आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः।

नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।

(ख) जनस्य साकेतनिवासिनस्तौ,

द्वावप्यभूतामभिनन्द्यसत्त्वौ।

गुरूप्रदेयाधिक निःस्पृहोऽर्थी,

नृपोऽर्थिकामादधिकप्रदश्च।।

## छन्द – अलंकार – कोष – प्रश्नाः

24) अधोलिखितेषु छन्दःसु द्वयोः लक्षणोदाहरणे लिखत – [1 + 1½ × 2 = 5]

(क) शिखरिनी

(ख) वसन्ततिलका

(ग) हरिणी

25) द्वयोः अलंकारयोः लक्षणोदाहरणे लिखत – [1 + 1½ × 2 = 5]

(क) अनुप्रासः

(ख) उपमा

(ग) श्लेषः

26) अधोलिखितकोषप्रश्नाः समाधेयाः –

(क) अमरकोशे कति काण्डानि सन्ति? [1]

(ख) अधोलिखितानां शब्दानां प्रत्येकं पर्यायद्वयं लिखत – [4]

लक्ष्मी, देवः, शिवः, गरूडः।

## शब्दरूप – धातुरूप – रचना – प्रश्नाः

27) निर्देशानुसारं शब्दरूपाणि लिखत। [1 + 1 + 1 + 1 = 4]

(क) तत् – शब्दस्य पुल्लिङ्गे, तृतीया विभक्तिः, एकवचनम्।

(ख) रमा – शब्दस्य द्वितीय विभक्तिः, बहुवचनम्।

(ग) वधू – शब्दस्य पंचमी विभक्तिः, एकवचनम्।

(घ) अस्मद् – शब्दस्य षष्ठी – विभक्तिः, बहुवचनम्।

28) निर्देशानुसारं धातुरूपाणि लिखत – [1 + 1 + 1 + 1 = 4]

(क) कृ–धातु–लट् लकार–प्रथमपुरूष–बहुवचनम्

(ख) लभ्–धातु–लोट्लकार–प्रथमपुरूष–एकवचनम्

(ग) वद्–धातु–लङ्लकार–प्रथमपुरूष–बहुवचनम्

(घ) दा–धातु–लृट्लकार–मध्यमपुरूष–द्विवचनम्

29) कमप्येकं विषयमवलम्ब्य शतपदेषु निबन्धं लिखत [4]

(क) श्रीरामः

(ख) संसकृतस्य महत्त्वम्

(ग) माघः

30) भवान् ध्रुवदीपः, राजकीय–प्रवेशिका – संस्कृत–विद्यालयः, कल्पनगरस्य छात्रः, भवतः परिवारः भ्रमणार्थं। दिनत्रयस्य अवकाशाय प्रधानाध्यापकाय प्रार्थनापत्रं लिखतु। [3]

अथवा

भवतः नगरस्य उद्याने अस्वच्छता आस्ति, बालक्रीड़ायाः साधानानि अपि न सन्ति। अतः व्यवस्थायाः कृते नगरसभापतिमहोदयाय पत्रं लिखतु।

♦ ♦ ♦

DO NOT WRITE ANYTHING HERE